# ॥ रामद्वादशनामस्तोत्रम् ॥

प्रथमं श्रीधरं विद्याद् द्वितीयं रघुनायकम्।
तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम्॥ १ ॥

पञ्चमं लोकपूज्यं च षष्ठमं जानकीपतिम्।
सप्तमं वासुदेवं च श्रीरामं चाष्टमं तथा॥ २ ॥

नवमं जलदश्यामं दशमं लक्ष्मणाग्रजम्।
एकादशं च गोविन्दं द्वादशं सेतुबन्धनम्॥ ३ ॥

द्वादशैतानि नामानि यः पठेच्छ्रद्धयान्वितः।
अर्धरात्रे तु द्वादश्यां कुष्ठदारिद्र्यनाशनम्॥ ४ ॥

अरण्ये चैव सङ्ग्रामे अग्नौ भयनिवारणम्।
ब्रह्महत्या सुरापानं गोहत्यादि निवारणम्॥ ५ ॥

सप्तवारं पठेन्नित्यं सर्वारिष्टनिवारणम्।
ग्रहणे च जले स्थित्वा नदीतीरे विशेषतः।
अश्वमेधशतं पुण्यं ब्रह्मलोकं गमिष्यति॥ ६ ॥

॥ इति श्री-स्कान्दपुराणे उत्तरखण्डे श्री-उमामहेश्वरसंवादे
श्री-रामद्वादशनामस्तोत्रं सम्पूर्णम्॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Rama_Dwadasha_Nama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits